International Journal of Academic Research and Development
ISSN: 2455-4197, Impact Factor: RJIF 5.22
www.academicsjournal.com
Volume 2; Issue 3; May 2017; Page No. 256-261

# भारतीयदर्शनेषु संकेतग्रहविवेचनम्

**योगेन्द्र भारद्वाज**

एम.फिल., विशिष्टसंस्कृताध्ययनकेन्द्रम्, जवाहर लाल नेहरू विश्वविद्यालय, नई दिल्ली, दिल्ली, भारत।

**प्रस्तवना**

व्यक्तेः विचाराणां भावानाञ्चाभिव्यक्तेः प्रमुखो साधनं वर्तते भाषा, भाषायाश्च लघुतमा इकाई शब्दोऽस्ति। वस्तुतः शब्दं विना व्यक्तिः स्वहृदयगतं भावं श्रोतां प्रति प्रेषितुं असमर्थ भवति। भाषया एव मानवाः स्वविचारान् प्रकटयन्ति। इयं भाषा अनेकावयवात्मिका। अस्या अवयवेषु ध्वनिवर्णपदवाक्यार्थादीनां गणना भवति। यथा वाक्यपदीये-

"न सोऽस्ति प्रत्ययो लोके यो शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥"[1]

भाषा मनुष्याणामनुपमोपलब्धिः वर्तते। भाषया एव मनुष्याः स्वविचारान् भावान् समाजे प्रदर्शयन्ति। आचार्यदण्डिनाऽपि काव्यादर्शे वदति यत्- "शब्दालोके एव मनुष्यः व्यवहरति।"[2] आचार्यभर्तृहरिणा शब्दस्वरूपं ब्रह्मत्वेन स्वीकृतः। तेषां मते जगत्सर्वं शब्देनैव व्यावर्तते।[3] भाषाया अभावे मानवजीवनमन्धकारमयं भविष्यति।"[4] इयं शब्दार्थसम्बन्धानाश्रित्य प्रचलति।

विश्व साहित्यस्य प्राचीनतमो ग्रन्थो ऋग्वेदे शब्दस्य महत्ता प्रतिपादितं यत्—"यावद् ब्रह्म विष्ठितं तावती वाक्"[5]। आचार्यदण्डी शब्दगरिमायाः गानमनेन प्रकारेण कृतम् यत्—

इदमन्धतमः कृत्स्नं जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥[6]

महाभाष्यकारेण आचार्यपतञ्जलिनाऽपि शब्दस्य महत्वं अनेन प्रकारेण प्रतिपादितम् यत्-" एकः शब्दः सुप्रयुक्तः सम्यग्ज्ञातः स्वर्गे लोके च कामधुक् भवति"।[7]

[1] वाक्यपदीयम्, ब्रह्मकाण्डं, कारिका.११४

[2] इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा। वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥(का. द., १/३)

[3] अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः॥ वा.ब्र. का. १

[4] "इदमन्धन्तमः कृत्स्नं जायते भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥ का. द.१/४

[5] ऋग्वेद संहिता ४/११३/८११

[6] काव्यादर्श-४/१

[7] महाभाष्य पस्पशाह्निक

आचार्य दण्डी पुनरुच्यते, यत्-

गौः गौः कामदुधा सम्यक् प्रयुक्ता साधितैः बुधैः।
दुष्प्रयुक्ता पुनर्गोत्वां प्रयोक्तुः सैव संशति॥[8]

अनेन प्रकारेण मानवस्य भावविचाराणाञ्च सशक्तमाध्यमं वर्तते शब्दः। वक्तायाः भावानामभिव्यक्तिः शब्दैरेव सम्भवति। श्रोता तान् शब्दान् श्रुत्वा अर्थग्रहणं करोति। वाक्यपदीये आचार्य भर्तृहरिणा शब्दार्थस्य विषये उक्तं यत्-

आत्मरूपं यथा ज्ञाने ज्ञेयरूपं च दृश्यते।
अर्थरूपं तथा शब्दे स्वरूपं च प्रकाशते॥[9]

शब्दार्थसम्बन्धः आरम्भादेव संस्कृताचार्याणां तथा पाश्चात्यविदुषां विचारणीयो विषयः वर्तते। आचार्य यास्केन निरुक्ते आदौ शब्दार्थनिर्वचनं कृतम्। मीमांसकाश्च शब्दार्थस्य परस्परं सम्बन्धविषये स्वमतं प्रकटीकृतम् यत्- "औत्यान्तिकस्तु शब्दस्यार्थेन संबन्धः तस्य ज्ञानमुपदेशो व्यतिरेकश्यार्थेऽनुपलब्धेतत् प्रमाणं बादरायण स्थानपेक्षत्वात्"।[10]

आचार्यभर्तृहरिणा शब्दार्थस्वरूपं उक्त्वा कथितम् यत्- "एकस्येवामनौ भेदौ शब्दार्था व पृथगस्थितौ"।[11] पाश्चात्यविद्वान् कार्लमार्क्सस्य प्रमुखशिष्येन भाषाशास्त्रिणः मेश्यनिवोदमहाभागेन शब्दार्थसाहचर्य विषये उक्तम् यत्- "Each word has its own meaning and there is no word without meaning."

महाकवि कालिदासमपि शब्दार्थस्वरूपे परमभट्टारकशिवं भगवतीपार्वत्या सह स्तौति। यथा रघुवंशमहाकाव्यस्य मङ्गलाचरणे स्तौति-

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥[12]

[8] काव्यादर्श- १/६

[9] वाक्यपदीयम्, १/५०

[10] जैमिनीय सूत्र

[11] वाक्यपदीयम् २/३१

[12] रघुवंश महाकाव्य -१.१

अनेन ज्ञायते यत् शब्दार्थस्य सम्बन्धं व्यक्त करणीया एक एव शक्ति वर्तते। सा एव शब्दशक्ति इति नाम्ना अभिहिता भवति। शब्दशक्तेः विषये वैयाकरणानां मतमस्ति यत्—"पदपदार्थयोः सम्बन्धान्तरमेव शक्ति वाच्यवाचक भावापरपर्याया तदग्राहकं यतोऽराध्यास्थूलं तादात्म्यम्"।[13] शब्दार्थस्य सम्बन्ध एव शक्ति वर्तते।

**शब्दस्वरूपम्**

वैयाकरणानां मते शब्दस्य स्वरूपः ब्रह्मणः सदृशं वर्तते। उक्तम् यत्—

अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥[14]

इति शब्दतत्त्ववादिनः शब्दस्य मूलतत्त्वं ब्रह्मस्वरूपे स्वीकुर्वन्ति । तत्र प्रायः सर्वे नित्यानित्यवादिनः दार्शनिका अपि शब्दस्य प्रमाणरूपेणाङ्गीकुर्वन्तीति । तस्य शब्दस्य प्रमाणत्वम् आप्तोक्तत्वादाम्नातत्वाच्च सिद्धः भवति । तत्र शब्दप्रमाणस्य फलं शाब्दबोध इति । तत्र शाब्दबोधे पदज्ञानं करणं भवति । तच्च साधकतमं कारणं करणम् असाधारणं कारणं वा । शाब्दबोधे पदार्थज्ञानं व्यापार उच्यते । व्यापारस्तु तज्जन्यत्वे सति तज्जन्यजनकत्वम् , तद्धि पदज्ञानजन्यत्वे सति पदज्ञानजन्या शाब्दीप्रमायाः जनक इति । शाब्दबोधस्तु तस्य प्रमाणस्य फलमिति । उक्तञ्च-

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।
शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥[15]

तत्र शाब्दबोधे आकाङ्क्षायोग्यतासत्तयः सहकारिकारणानि भवन्ति। एवञ्च पदपदार्थयोर्मध्ये यस्सम्बन्धः स तु वृत्तिः शक्तिश्च नाम्नाभिधीयते। आकाङ्क्षायोग्यताऽऽसत्तिमतां पदानां समुच्चयः वाक्यं भवति । आचार्यविश्वनाथेनोक्तं साहित्यदर्पणे यत् –

वाक्यं स्यादाकाङ्क्षायोग्यतासत्तियुक्तः पदोच्चयः ।[16]

**योग्यता**

एकपदार्थे अपरपदार्थसम्बन्धो योग्यता। पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता।[17] योग्यता विषये तर्कसंग्रहे अत्यन्तसारल्येन उक्तमस्ति यत् "अर्थाबाधो योग्यता"। यथा- वह्निना सिंचतीति वाक्यं न प्रमाणम्, योग्यताविरहात्।"[18] अग्निना सिंचनक्रिया न संभवति। लोकव्यवहारे अस्य वाक्यार्थस्य विप्रतिपत्तिः दृश्यते। अतो योग्यताभावान्न वाक्यम्।

**आकाङ्क्षा**

"प्रतीतिपर्यवसानविरहः आकाङ्क्षा"[19] । सा च श्रोतुर्जिज्ञासा रूपः। यथा- कोऽपि वदति –"देवदत्तः" इति, तदा भवति जिज्ञासा "कः देवदत्तः" "किं करोती"ति । अतो देवदत्तपदं क्रियापदस्य कर्मपदस्य चावश्यकता वर्त्तत इति । अतो "देवदत्तः विद्यालयं गच्छती"त्यस्य साकाङ्क्षत्वाद्वाक्यत्वं सम्भवतीति । परन्तु निरकाङ्क्षपदस्य वाक्यत्व न स्यादिति । यथा- रामः पशुहस्तिरश्व इति न प्रमाणमिति आकाङ्क्षाविरहत्वात् ।

**आसत्ति**

"आसत्तिर्बुद्ध्यविच्छेदः"[20], अविलम्बेनोच्चारणं वा । यथा – कोऽपि वदति प्रातःकाले "अहम्", सायं काले वदति "भोजनम्", अग्रिमे सप्ताहे वदति "खादामी"ति, तर्ह्यस्य वाक्यस्य बिलम्बेनोच्चारणात्वान्न प्रमाणमिति उक्तम्मुक्तावल्याम् –"सन्निधानं तु पदस्यासत्तिरुच्यते"[21] ।

शाब्दबोधस्य विषये मुक्तावल्यामुक्तं यत्—"शाब्दबोधप्रकारं पदज्ञानेन दर्शयति। न तु ज्ञायमानं पद करणम्। वृत्तिश्च शक्तिलक्षणान्यतरसंबन्धः। अत्रैव शक्तिज्ञानस्योपयोगः। पूर्वशक्तिग्रहाभावे पदज्ञानेऽपि तत्संबन्धेन तत्स्मरणानुत्पत्तेः। पदज्ञानस्य हि एकसम्बन्धिज्ञानविधया पदार्थोपस्थापकत्वम्। शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः सा चास्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपा आधुनिके नाम्नि शक्तिरस्त्येव एकादशेऽहनि पिता नाम कुर्यादितीश्वरेच्छायाः सत्त्वात् आधुनिके संकेतिते तु न शक्तिरिति संप्रदायः नव्यास्तु ईश्वरेच्छा न शक्तिः किंत्विच्छैव तेनाधुनिकसङ्केतितेपि शक्तिरस्त्येवेत्याहुः। शक्तिग्रहस्तु व्याकरणादितः"।[22]

**सङ्केतग्रहस्योपाय**

सङ्केतग्रहविषये लोकव्यवहारातिरिक्तं अन्योपायाऽपि सन्ति तेषां विषये उक्तं यत्-

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः"॥

अर्थात् व्याकरणेन, उपमानेन, कोशेन, आप्तवाक्येन, व्यवहारेण, वाक्यशेषेण तथा विवृत्तिना अर्थात् व्याख्यया एवं सिद्ध-ज्ञात-पदस्य सान्निध्येनापि शक्तिरथवा सङ्केतग्रहणं भवति। तेषु मुख्योपायः व्यवहारः वर्तते, यतोहि शब्दानां प्रथमं शक्तिग्रहं तु व्यवहारेणैव भवति।

---

[13] व्याकरणसिद्धान्तमञ्जूषा,शक्तिनिरुपण,पृ.२३
[14] वाक्यपदीयम्- १/१
[15] न्यायसिद्धान्तमुक्ताली -८१
[16] साहित्यदर्पणम्- २/१
[17] का.-सि.मु,श.खं,पृ.पृ०७८
[18] त.सं. पृ०१७१.
[19] साहित्यदर्पणम् -२/१ व्याख्या
[20] साहित्यदर्पणम्-२/१ व्याख्या
[21] न्यासिद्धान्तमुक्तावली -८३
[22] न्यायसिद्द्धान्तमुक्तावली,शब्दखण्ड,८१ वृत्ति

**व्याकरणात् सङ्केतग्रह**

व्याकरणेन भू सत्तायाम्' इति धातोः सत्तास्वरूपे शक्तिग्रहः, तथा च "साधकतमं करणम्" इत्यादिसूत्रैः भूधातोः तथा करणादि पदानां संकेतग्रहः व्याकरणेन भवति।

**उपमानाच्छक्तिग्रह**

"यथा गौस्तथा गवय" इदमस्ति उपमानस्योदाहरणम्। अत्र कश्चिद् व्यक्तिः यः गवय पदार्थमजानन् आरण्यकं पुरुषं प्रति-पृच्छति यत् गवय कीदृशी भवति ? तदा स कथयति यत् 'यथा गौस्तथा गवय' इति। तदा स पुरुषः अरण्यं गत्वा गवय पिण्डं पश्यति, तं दृष्ट्वा सादृश्यज्ञानातिदेशवाक्यस्मरणात् गवय इत्यस्य ज्ञानमुपमानेन भवति।

**कोशाच्छक्तिग्रह**

कोशादपि शक्तिग्रहः भवति। सति बाधके क्वचित्त्यज्यते। यथा नीलादिपदानां नीलरूपादौ नीलविशिष्टे च शक्तिः कोशेन व्युत्पादिता। आचार्य कुमारिलभट्टेन श्लोकवार्तिके उक्तं यत्—"गुणे शुक्लादयः पुंसि गुणि लिङ्गास्तु तद्वति"।[23]

**आप्तवाक्याच्छक्तिग्रह**

आप्तवाक्यादपि शक्तिग्रहः भवति। उक्तं मुक्तावल्यां यत्- "कोकिलः पिकशब्दवाच्य इत्यादिशब्दात् पिकादिशब्दानां कोकिले शक्तिग्रहः" यतो हि "यथा भूतस्यार्थस्योपदेष्टाऽऽप्तः"[24] "यथार्थवक्ता"[25] चेति ।

**व्यवहाराच्छक्तिग्रह**

अयं मुख्योपायः वर्तते। अस्मिन् उपाये अन्यात् अर्थात् पर पुरुषात् कोऽपि वचनमथवा कार्यं दृष्ट्वा श्रुत्वाच बालकमथवा कोऽपि जनः कार्यं करोति स एव व्यवहारेण बोध्यम् भवति। तत्र उपदेष्टा तथा च आज्ञापालकं जनस्य महती आवश्यकता वर्तते। तथा चात्र अन्यस्य अभिज्ञ जनस्यापि आवश्यकता वर्तते। उक्तं यत् मुक्तावल्याम्—"प्रयोजकवृद्धेन घटमानयेत्युक्तं तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तदवधार्य पार्श्वर्थो बालो घटानयनरूपं कार्यं घटमानयेतिशब्दप्रयोज्यमित्यवधारयति। ततश्च घटं नय गामानयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति"[26]।

**वाक्यशेषाच्छक्तिग्रह**

वाक्यशेषादपि शक्तिग्रहः। यथा यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घरूकविशेषे आर्याणां प्रयोगः कङ्गौ च म्लेच्छानाम्। तत्र हि "यदान्या औषधयो म्लायन्तेऽथैते मोदमानास्तिष्ठति"।

"वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशालिनः"।[27]

इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते,कङ्गौ तु शक्तिभ्रमात्प्रयोगो नानाशक्तिकल्पने गौरवात्। हर्यादिपदे तु विनिगमकाभावान्नानाशक्तिकल्पनम्।

**विवरणाच्छक्तिग्रह**

'विवरणादपि शक्तिग्रहं भवति। विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम्। यथा-घटोऽस्तीत्यस्य कलशोऽस्त्यनेन विवरणाद् घटपदस्य कलशे शक्तिग्रहः।'[28] वाक्यविवेचनेन व्युत्पत्यादिप्रकारकं यथा-अश्नुते व्याप्नोति अध्वानं इति अश्वः।

**सिद्धपदाच्छक्तिग्रहः -** लोकव्यवहारतः सिद्धम्, रूढितः यथा-पंकजमिति कमलमित्यर्थे रूढः।

**सानिध्याच्छक्तिग्रह**

संयोगेन यथा - हरिः शब्दस्य अनेके अर्थाः भवन्ति। सहचर्येणैवार्थग्रहणं भवति सशंखचक्रो हरिः इत्यस्मिन्वाक्ये ,हरिशब्दः विष्णुविधायकः इति।

**व्यक्तिवादिनां मते सङ्केतग्रह**

ये व्यक्तिवादिनः सन्ति, तेषां मते तु व्यक्तावेव संकेतग्रहः भवति। यतोहि व्यवहारप्रधानं भवति शक्तिग्रहः तथा च व्यवहारज्ञानं व्यक्तिना एव भवति। । यतो हि कोऽपि कमादिशति यत् गामानयेति तदा स आदेशपालकः बालः गोव्यक्तेरेवानयनं करोति, न तु जातेः। न च गुणस्य न च क्रियायाः, न वा यदृच्छात्मकद्रव्यस्य । अतो व्यक्तावेव शक्तिग्रहः। यतो हि आनयनापनयनाद्यर्थक्रियानिर्वाहकतया प्रवृत्तिनिवृत्तिरूपव्यवहारयोग्यः व्यक्त्येव । यथा "गामानय" "गां नय" उभयत्र आनयनमपनयनं गोरित्यस्यैव भवति' एवञ्च गौरानयनेऽपनयने च प्रवृत्तिः गवि भवति, निवृत्तिस्तु गौभिन्नव्यक्तिष्विति । "यद्यप्यर्थक्रियाकारितया प्रवृत्तिनिवृत्तियोग्या व्यक्तिरेव"[29] इति ।

तथा च "तथाप्यानन्त्याद् व्यभिचाराच्च तत्र संकेतः कर्तुं न युज्यते, इति गौः शुक्लश्चलोडित्थ इत्यादिनां विषयविभागो न प्राप्नोतीति च तदुपाधावेव संकेतः"[30] अर्थात् यदि "गौः गौः" इत्यादयः अनेका गौव्यक्तिषु भिन्नः शक्तिग्रहः स्वीक्रियन्ते चेत् तर्हि तत्र गौरित्यस्यानेकत्वात् शक्तिग्रहोऽपि अनेकः स्यात्। तदा तु "आनन्त्य दोष" आगमिष्यति। एवञ्च तदानन्त्यदोषवारणाय यद्यनेकेषु गोघटादिव्यक्तिषु मध्ये एकस्मिन् द्वयोर्वा संकेतः गृह्यते, तथा तद्भिन्नेषु यदि बोधः विना संकेतेनैव स्यात् तर्हि व्यभिचारदोषः ।

---

[23] श्लोकवार्तिक

[24] तर्कभाषा

[25] तर्कसंग्रहः

[26] न्यायसिद्धान्तमुक्तावली- शब्दखण्ड-८३

[27] न्यायसिद्धान्तमुक्तावली- शब्दखण्ड -वृत्ति

[28] न्या.सि.मु. पृ.२३.

[29] काव्यप्रकाशः ८

[30] काव्यप्रकाशः८

"व्यभिचारस्तु तदभावे तत्सत्त्वम् कारणाभावे कार्यसत्त्वमिति"। अत एवव्यक्त्यावानन्त्यादोषाद्व्यभिचारदोषाच्च न संकेतो गृह्यते।

**उपाधौ शक्तिग्रह**

उपाधौ सङ्केतग्रहः वैयाकरणाः मन्यन्ते। तस्याः व्यक्तेरुपाधिर्विशेषणं जात्यादौ शब्दः प्रवृत्तिनिमित्तमित्यर्थः। आचार्य मम्मटेन काव्यप्रकाशे जात्यादीनां भेदं वक्तुमुपाधि विभजते उपाधिश्चेति—"उपाधिश्च द्विविधः, वस्तुधर्मो वक्तृयदृच्छासन्निवेशितश्च। वस्तुधर्मोऽपि द्विविधः, सिद्धः साध्यश्च। सिद्धोऽपि द्विविधः,पदार्थस्य प्राणप्रदो विशेषाधानहेतुश्च। तत्राद्यो जातिः। उक्तम् हि वाक्यपदीये—"नहि गौः स्वरूपेण गौर्नाप्यगौः गोत्वाभिसम्बन्धात्तु गौः"इति।[31]




**जातौ संकेतग्रह**

तर्कसंग्रहकारेण जातेः लक्षणं कृतम् यत्- "नित्यमेकमनेकानुगतं सामान्यम्"[32]। न्यायवैशेषिके सामान्यमेव जातिरित्युच्यते। "नित्यत्वे सति अनेकसमवेतत्वं जातिः"।[33] काव्यप्रकाशकारेणोक्तं यत् पदार्थस्य प्राणप्रदो धर्मः जातिरित्युच्यते।

**गुणे सङ्केतग्रह**

उक्तं काव्यप्रकाशे—"द्वितीयो गुणः शुक्लादिना हि लब्धसत्ताकं वस्तु विशिष्यते।[34] अर्थात् वस्तोः विशेषाधानहेतु सिद्धो वस्तुधर्मो गुणो वर्तते। यतोहि शुक्लत्वादि गुणानां कारणादेव वस्तुः सजातीय अन्येभ्यः पदार्थेभ्यः भिन्नतां प्राप्नोति। साहित्यदर्पणेऽपि उक्तं आचार्य विश्वनाथेन यत्- "गुणो विशेषाधानहेतुः सिद्धः वस्तुधर्मः । शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्ति[35]"इति।

**क्रियायां सङ्केतग्रह**

क्रियायां सङ्केतग्रहविषये मम्मटेनोक्तं यत्- "साध्यः पूर्वापरीभूतावयवः क्रियारूपः"।[36] तथाहि अधिश्रयणादिरवश्रयणान्तो व्यापारकलापः पाकः क्रियाः। उक्तं भर्तृहरिणा वाक्यपदीये-

"गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पितो भेदः क्रियेति व्यपदिश्यते॥
समूहः स तथाभूतः प्रतिभेदं समूहिषु।
समाप्यतो ततो भेदे कालभेदस्य सम्भवः॥[37]

यथात्र पचेर्विक्लित्तिः। तत्र पूर्वोऽधिश्रयणादिः अपर उदकसेकादिः। तौ च पाकक्रियावयवरूपौ तत्र पूर्वस्य परं प्रति साधनत्वम्। अपरस्य पूर्वत्वमपीति भवत्यवयवानां पूर्वापरीभावः।

विश्वनाथस्तु – "क्रियाः साध्यरूपा वस्तुधर्माः पाकादयः । एषु हि अधिश्रयणावश्रय- णान्तादिपूर्वापरीभूतो व्यापारकलापाः पाकादिशब्दवाच्यः[38]"इति ।

**यदृच्छया सङ्केतग्रह**

वक्तृयदृच्छेत्यादिनोक्तं चतुर्थमुपाधिं विशदयति आचार्यमम्मटेन काव्यप्रकाशे यत्- "डित्थादिशब्दानामन्त्यबुद्धिनिर्ग्राह्यं संहृतक्रमं स्वरूपं वक्त्रा यदृच्छया डित्थादिष्वर्थेषूपाधित्वेन सन्निवेश्यते इति सोऽयं संज्ञारूपो यदृच्छात्मक इति"। तथा च साहित्यदर्पणेऽपि उक्तम् अस्मिन् विषये यत्-"द्रव्यशब्दा एकवाचिनो हरिहरडित्थडवित्थादयः[39]"। एते हि हरिहरडित्थडवित्थादयः एकव्यक्तिवाचिन इति ।

अतोपधावेव संकेतो युज्यत इति । आचार्यमम्मटेन महाभाष्यकारस्य मतमपि काव्यप्रकाशे निर्दिष्टं यत् ते शब्दानां प्रवृत्ति जाति-गुण-क्रिया-यदृच्छायाः आधारे मन्यन्ते। उक्तञ्च- "गौःशुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः"इति महाभाष्यकारः"।[40]

अनेनैव एतद् सिद्ध्यते यत् वैयाकरणानाम्मतम् तथा मम्मटविश्वनाथादि साहित्यिकानाम्मतं सङ्केतग्रहविषये समानं वर्तते। तेषां मते सङ्केतग्रहः जातिरूपेण-गुणरूपेण-क्रियारूपेण एवञ्च यदृच्छारूपेण भवति। यथोक्तं मम्मटाचार्येण--

[31] काव्यप्रकाश-८

[32]

[33]

[34] काव्यप्रकाश-८ वृत्ति

[35] साहित्यदर्पणः २/४

[36] काव्यप्रकाश-८ वृत्ति

[37] वाक्यपदीयम् तृतीयकाण्ड-४-५

[38] साहित्यदर्पणः २/४

[39] साहित्यदर्पणः २/४

[40] काव्यप्रकाश-८ वृत्ति

"संकेतितश्चतुर्भेदो जात्यादिः[41]"इति । तथा च आचार्यविश्वनाथस्यमतमेतत् वर्तते साहित्यदर्पणे यत्—"संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च[42] इति । अतएवोच्यते—

शब्दैरेव प्रतीयन्ते जातिद्रव्यगुणक्रियाः ।
चातुर्विध्यादमीषां तु शब्द उक्तश्चतुर्विधः ॥[43]

**मीमांसकानां मते संकेतग्रह**

"संकेतितश्चतुर्भेदो जात्यादिर्जातिरेव वा" कारिकांशेऽस्मिन् संकेतितार्थस्य विषये "जात्यादिः" तथा च "जातिरेव वा" द्वौ पक्षौ निर्दिष्टौ स्तः। तत्र द्वितीयो पक्षः जातिरेव वा इति मीमांसकानां मतमस्ति। मीमांसकानां सिद्धान्तो वर्तते यत् जात्यादयोः स्थाने केवलं जातौ एव शब्दस्य शक्तिः अथवा सङ्केतग्रहो भवति। अर्थात् केवलं जातिरेव शब्दस्य प्रवृत्ति-निमित्तमुचितम्। जातिः शब्दानां समानं गुणक्रियायदृच्छादि शब्देषु जातावेव संकेतग्रहः स्वीक्रियते। अनुगतमर्थात् एकाकारस्य प्रतीतेः कारणं "सामान्यम्" अथवा "जाति"रिति कथ्यन्ते। गुण-क्रिया-यदृच्छादयोश्शब्देषु जातेरनुसन्धानं भवितुं शक्यते। काव्यप्रकाशे आचार्य मम्मटेनोक्तं यत् - 'हिम-पयः-शङ्खाद्याश्रयेषु परमार्थतो भिन्नेषु शुक्लादिषु यद्वशेन शुक्लः शुक्लः इत्यभिन्नाभिधानप्रत्ययोत्पत्तिस्तत् शुक्लत्वादि सामान्यम्'।[44] अर्थात् "शुक्लः हिमः, शुक्लः पयः, शुक्लः शङ्खः" इत्यादय एकाकारप्रतीतिरथवा अनुगत प्रतीतिः भवति। अस्य कारणमस्ति "शुक्लत्व-सामान्यं" अर्थात् शुक्लत्वजातिवशादेव अस्यैकाकाराप्रतीतिः वर्तते।

अनेनैव प्रकारेण गुड-तण्डुलादयः नैकपदार्थानां पाके स्थिताः पाकक्रियायां "पाकः पाकः" इति अनुगतप्रतीतेः कारणं "पाकत्व-सामान्यं" वर्तते। काव्यप्रकाशे आचार्य मम्मटेनोक्तं यत्—"गुडतण्डुलादिपाकादिष्वेवमेवपाकत्वादि"।[45] अत्र भिन्नं द्रव्येण सह एक एव पाकक्रियायाः प्रयोगं वर्तते। तथा चैतत् पाक शब्देनैव तेषां द्रव्यानां प्रतीतिः भवति।

यदृच्छाशब्दे शङ्का उत्पद्यते यत् स तु एकैव शब्दः, तदा तत्र कथं जाति ? तस्य समाधाने उक्तं यत्- बालेनोच्चरित डित्थशब्दः, वृद्धेनोच्चरित डित्थशब्दः, तथा शुकेनोच्चरित डित्थशब्दः आदि एकव्यक्तिवाचक शब्दः बालवृद्धशुकादि भिन्नेषु व्यक्तिषु अनेकत्व मत्वा तेष्वनुगतप्रतीतिकारिणी डित्थत्वादि जातेः कल्पना भवितुं शक्यते। काव्यप्रकाशे आचार्येणोक्तम्- "बालवृद्धशुकाद्युदीरितेषु डित्थादिशब्देषु च, प्रतिक्षणं भिद्यमानेषु डित्थाद्यर्थेषु वा डित्थत्वाद्यस्तीति सर्वेषां शब्दानां जातिरेव प्रवृत्तिनिमित्तमित्यन्ये"[46] इति।

**नैयायिकानां मते संकेतग्रह**

सङ्केतग्रहविषये वैयाकरणाऽऽलङ्कारिकमीमांसकानाञ्च मतातिरिक्तं नैयायिकानामपि पृथकमतम् स्यात् । काव्यप्रकाशे मम्मटाचार्योच्यते नैयायिकानां मतम्, यत्-"तद्वान् इति"।[47] अर्थात् नैयायिकानाम्मते न केवलं जातौ शक्तिग्रहः, न च केवलं व्यक्तौ। यदि व्यक्तौ संकेतग्रहः स्वीक्रियते चेत्, व्यभिचारानान्त्यौ दोषौ स्तः। तथा च केवलं जातौ सङ्केतग्रहे आक्षेपेण व्यक्तेः भानम्मत्वा शाब्दबोधे अन्वयं भवितुं न शक्यते। यतोहि "शाब्दी हि आकाङ्क्षा शब्देनैव पूर्यते" इति सिद्धान्तानुसारं शब्दशक्तिना लभ्यार्थस्यैव शाब्दबोधे अन्वयं भवितुं शक्यते। अतएव नैयायिकानां मते केवलं व्यक्तौ, न च केवलं जातौ शक्तिग्रहः न स्वीकर्तुं शक्यते। अतएव "व्यक्त्याकृतिजातयस्तु पदार्थः"[48] इति सूत्रेण जात्याकृतिना विशिष्टव्यक्तिः पदस्यार्थः भवति, अयं नैयायिकानां सिद्धान्तः। आचार्य मम्मटेनोक्तं तद्वान् शब्दस्यार्थ जातिमान् इति वर्तते अर्थात् जातिविशिष्टव्यक्तौ सङ्केतग्रहः मन्यतेति नैयायिकाः।

**बौद्धानां मते सङ्केतग्रह**

बौद्धदार्शनिकानाम्मते सङ्केतग्रहः भिन्नं वर्तते। यथा मम्मटेनोक्तं-"अपोहो वा"[49] इति। तेषाम्मते शब्दस्यार्थः अपोहो भवति। अपोहस्यार्थो वर्तते "अतद्-व्यावृत्ति" अथवा "तद्भिन्नभिन्नत्वमि"ति। दशव्यक्तिषु "घटः-घटः" इयम् एकाकारा प्रतीतेः कारणं नैयायिकादयः "घटत्व सामान्यं" मन्यन्ते। तेषां मते "सामान्य" नामको पदार्थ विशेषं वर्तते, यतोहि "नित्यत्वे सति अनेकसमवेतत्वमि"ति सामान्यस्य लक्षणं वर्तते। परञ्च बौद्धानां प्रथमं सिद्धान्तमेव "क्षणभङ्गवादो" वर्तते। तेषां मते सर्वे पदार्थाः क्षणिकाः सन्ति, अतएव ते सामान्यं नित्यपदार्थं न मन्यन्ते। तस्य स्थाने अनुगतप्रतीतेः कारणं ते "अपोहम्" इति स्वीक्रियन्ते। अपोह शब्दः बौद्धदर्शनस्य पारिभाषिकशब्दः स्यात्। तस्यार्थः "अतद्-व्यावृत्तिः" अथवा "तद्भिन्नभिन्नत्वम्" इति वर्तते। अर्थात् दशव्यक्तिषु "घटः-घटः" इत्यनुगत प्रतीतिः भवति, तत्कारणं "अघट-व्यावृत्तिः" अथवा "घटभिन्नभिन्नत्वम्" अस्ति। अतएव बौद्धानां मते अपोह एव शब्दस्यार्थः भवति। तेनैव सङ्केतग्रहो भवति इति मन्यन्ते बौद्धाः।

वस्तुतः विभिन्नशास्त्रेषु प्रतिपादितं संकेतग्रहस्य विषयं वर्णितमस्ति। तत्र आलङ्कारिका अपि वैयाकरणानां सदृशं चतुर्षु जातिगुणक्रियायदृच्छात्मकेषु शब्देषु संकेतग्रहः मन्यन्ते। अस्यैव प्रमाणं आचार्य मम्मटेन स्वकीये काव्यप्रकाशनामकग्रन्थे प्रकटीकृतम्। एतद्भिन्नं मीमांसकाः जातिरेव संकेतग्रहः, नैयायिकाः जातिविशिष्टव्यक्तेः संकेतग्रहः, बौद्धानाञ्च भिन्नमतं वर्तते संकेतग्रहविषये। ते तु तद्भिन्नभिन्नत्वे अर्थात् अपोहे संकेतग्रहः मन्यन्तेति शुभम्।

---

[41] काव्यप्रकाशः ८

[42] साहित्यदर्पणः २/४

[43] शब्दशक्तिप्रकाशिका

[44] काव्यप्रकाश,द्वितीयोल्लास

[45] काव्यप्रकाश,द्वितीयोल्लास

[46] काव्यप्रकाश,द्वितीयोल्लास

[47] काव्यप्रकाश,द्वितीयोल्लास

[48] न्यायसूत्र-२/२/६८

[49] काव्यप्रकाश,द्वितीयोल्लास

**सन्दर्भ ग्रन्थ सूची**


1. काव्यप्रकाशः– विश्वेश्वर आचार्यः – आज भवन, सन्त कबीर मार्ग वाराणसी, २०१७ वि.सं. ।
2. काव्यप्रकाशः, मोहन ज्योत्स्ना, नाग प्रकाशक , १९९५, बालचित्तानुरञ्जनी, काव्यादर्श, दर्पणः, दीपिकादयः सप्तदशव्याख्या संलङ्कृता। कविचन्द्रविश्वनाथविवरणटीकोपेतः- षडङ्गी सुरेन्द्रनाथ, न्यू भारतीय बुक कोर्पोरेशन, दिल्ली, २००२ ।
3. काव्यप्रकाशः, भट्टवामनाचार्यः, परिमल पब्लिकेशन्स दिल्ली,२००८।
4. न्यायदर्शनम्, उदय नारायण सिंह, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली।
5. भट्ट, विश्वनाथपञ्चानन, न्यायसिद्धान्तमुक्तावली, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
6. साहित्यदर्पणः, व्या. सत्यव्रत सिंह, चौखम्बा विद्याभवन वाराणसी ।
7. तर्कभाषा, व्या. सुरेन्द्रदेव शास्त्री , चौखम्बा संस्कृत प्रतिष्ठान , दिल्ली ।
8. तर्कसंग्रहः व्या. बालशास्त्री , चौखम्बा सुरभारती प्रकाशन , वाराणसी ।
9. वाक्यपदीयम्, व्या.पण्डित रघुनाथ शर्म, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी ।
10. महाभाष्यम्, व्या. आचार्य मधुसूदनप्रसाद शास्त्री, चौखम्बा विद्याभवन, वाराणसी ।